शिवा रटन्ती कुरुते नराणां
सन्त्रासकार्य्यव्ययबन्धनानि ॥
समागते रात्रितुरीययामे
निशाकरेशानसुरेशदिक्षु ।
शिवा रटन्ती कुरुते नराणां
सन्त्रासकार्य्यव्ययबन्धनानि ॥”
इति शिवारुते दग्धदीप्तधूमितदिक्त्रययाम-
प्रकरणं प्रथमम् ॥*॥
“इतीरितं दिक्त्रययामयोगात्
फलं विरुद्धं विरुतैः शिवायाः ।
ब्रूमोऽथ दिक्पञ्चकयामयोगात्
फलानि पुंसां क्रमतः शुभानि ॥
कृतान्तरक्षोवरुणानिलेन्दु-
दिक्ष्वाद्ययामे रटितैः शृगाल्याः ।
स्यादिष्टवार्त्ताश्रुतिरिष्टसिद्धि-
र्लाभः सुभिक्षं प्रियलोकसङ्गः ॥
रक्षःप्रचेतोऽनिलसोमशम्भु-
दिक्षु द्वितीये प्रहरे रुतेन ।
स्यादिष्टवार्त्ताश्रुतिरिष्टसिद्धि-
र्लाभः सुभिक्षं प्रियलोकसङ्गः ॥
जलेशवातेन्दुशिवामरेश-
दिक्ष्वारवेण प्रहरे तृतीये ।
स्यादिष्टवार्त्ताश्रुतिरिष्टसिद्धि-
र्लाभः सुभिक्षं प्रियलोकसङ्गः ॥
समीरसोमेशसुरेशवह्नि-
दिक्षु स्वरेण प्रहरे चतुर्थे ।
स्यादिष्टवार्त्ताश्रुतिरिष्टसिद्धि-
र्लाभः सुभिक्षं प्रियलोकसङ्गः ॥
शशाङ्करुद्रेन्द्रहुताशकाल-
दिक्ष्वारवैः पञ्चमयामभागे ।
स्यादिष्टवार्त्ताश्रुतिरिष्टसिद्धि-
र्लाभः सुभिक्षं प्रियलोकसङ्गः ॥
ईशानशक्राग्निकृतान्तरक्षो-
दिक्षु स्वरेण प्रहरे च षष्ठे ।
स्यादिष्टवार्त्ताश्रुतिरिष्टसिद्धि-
र्लाभः सुभिक्षं प्रियलोकसङ्गः ॥
इन्द्राग्निकालास्रपपाशपाणि-
दिक्ष्वारवैः सप्तमयामकाले ।
स्यादिष्टवार्त्ताश्रुतिरिष्टसिद्धि-
र्लाभः सुभिक्षं प्रियलोकसङ्गः ॥
अत्यन्तकृन्नैरृतपाशिवात-
दिक्ष्वष्टमे च प्रहरे रवेण ।
स्यादिष्टवार्त्ताश्रुतिरिष्टसिद्धि-
र्लाभः सुभिक्षं प्रियलोकसङ्गः ॥”
इति श्रीवसन्तराजे शिवारुते दिग्यामप्रकरणं
द्वितीयम् ॥*॥
“एकादिकानां निधनाष्टमानां
शिवारुतानामधुना यदर्थम् ।
प्राच्यादिकास्वष्टसु दिक्ष्वशेषं
यद्यत् फलं तत्तदुदीरयामः ॥
धनान्यभीष्टाप्तिमभीष्टलाभं
ध्रुवं ततोऽर्थस्य फलं शुभञ्च ।
भयं प्रलापं सकलञ्च सौख्य-
मेकादिशब्दैः कुरुते प्रशान्ते ॥
भयान्यनिष्टश्रुतिरर्थहानि-
रिष्टैर्वियोगो महती च भीतिः ।
स्यादिष्टहानिर्मरणञ्च दीप्ते
त्वेकादिना चेत् क्रतसप्तकेन ॥
ऐन्द्र्यां निनादे प्रथमेऽर्थलाभो
भवेद्द्वितीये निधिदर्शनञ्च ।
कन्यां तृतीये लभते चतुर्थे
ऽध्वागमं पञ्चमकेऽथ सिद्धिम् ॥
षष्ठे रवे कुप्यति भूमिनाथो
भीः सप्तमे स्याद्विफलोऽष्टमेषु ॥
त्रासोऽग्निभागे प्रथमे द्वितीये
नराधिपः कुप्यति भीस्तृतीये ॥
घातश्चतुर्थे नगरस्य शब्दे
शिवाकृते पञ्चमके च युद्धम् ।
वदन्ति तज्ज्ञाः कलहञ्च षष्ठे
भीः सप्तमे स्याद्विफलोऽष्टमस्तु ॥
आद्ये शुभं स्यादशुभं द्वितीये
याम्ये महाव्याधिभयं तृतीये ।
स्वरे चतुर्थे स्वजनागमः स्यात्
पुत्त्रो भवेत् पञ्चसु फेत्कृतेषु ॥
आयेत कन्या रटिते च षष्ठे
भीः सप्तमे स्याद्विफलोऽष्टमस्तु ।
ग्रामस्य घातो दिशि राक्षसाना-
माद्ये द्वितीयेऽपि च गोकुलस्य ॥
मृत्युस्तृतीये द्विचतुष्पदानां
हानिश्चतुर्थेऽपि च पञ्चमेऽत्र ।
चौराद्भयं राजभयञ्च षष्ठे
भीः सप्तमे स्याद्विफलोऽष्टमस्तु ॥
शब्दे शिवाया वरुणस्य भागे
आद्ये भयं हानिरथ द्वितीये ।
स्याद्राजदूतागमनं तृतीये
दाहश्चतुर्थे खलु चौरभीतिः ॥
स्यात् पञ्चमे राजभयञ्च षष्ठे
भीः सप्तमे स्याद्विफलोऽष्टमस्तु ।
वायव्यभागे भयमेकशब्दे
भयातिरेको भवति द्वितीये ॥
हृष्टिस्तृतीये महती चतुर्थे
मेघागमो वर्षति पञ्चमे च ।
क्रोधं विधत्ते नृपतेश्च षष्ठे
भीः सप्तमे स्याद्विफलोऽष्टमस्तु ॥
दिश्युत्तरस्यां विहिते विरावे
म्रियेत कश्चित् प्रथमे द्वितीये ।
महाभयं विप्रवधस्तृतीये
क्षत्त्रं चतुर्थे खलु हन्यते च ॥
विट् पञ्चमे षष्ठरवे च शूद्रो
भीः सप्तमे स्याद्विफलोऽष्टमस्तु ।
राहोस्तथा दर्शनमाद्यशब्दे
केतोर्द्वितीये च तथोत्तरेण ॥
उल्काप्रपातस्त्रिषु दुर्द्दिनञ्च
चतुर्षु भद्रं खलु पञ्चमे च ।
सङ्गो भवेद्वैरिजनस्य षष्ठे
भीः सप्तमे स्याद्विफलोऽष्टमस्तु ॥
आद्ये भवेद्दुर्द्दिनमीशदेशे
हृष्टिर्द्वितीये च रवे शिवायाः ।
वातस्तृतीये त्वशनिश्चतुर्थे
म्रियेत कश्चित् खलु पञ्चमे च ॥
लभेत पृथ्वीं निनदे च षष्ठे
भीः सप्तमे स्याद्विफलोऽष्टमस्तु ॥”
इति श्रीवसन्तराजे शिवारुते स्वराष्टकप्रकरणं
तृतीयम् ॥ * ॥
“क्षेमलाभपुनरागमनानां
निश्चयं यमधिगम्य विशङ्कः ।
येन याति पथिकः परदेशं
तं शिवारुतमथ प्रथयामः ॥
यं यं देशं गन्तुमभ्युद्यतानां
पुंसां शब्दानुच्चरन्ती शृगाली ।
शान्तायां सा सिद्धये वाञ्छितानां
दीप्तायान्तु स्यादभीष्टक्षयाय ॥
प्राचीं दिशं सन्मुखभानुबिम्बं
प्रतिष्ठमानस्य नरस्य यस्य ।
शब्दं शृगाली पुरतः करोति
बन्धं वधं वा प्रकरोति तस्य ॥
प्राचीदिगीशाभिमुखस्य पुंसः
प्रस्थानकामस्य शिवा सशब्दा ।
भियेऽर्थनाशाय च दक्षिणा स्या-
द्वामा पुनर्वाञ्छितकार्य्यसिद्धै ॥
प्रत्यर्कमाशां चलितस्य पूर्व्वां
शिवा विरावं पुरुषस्य यस्य ।
करोति पृष्ठे प्रकरोति तस्य
सर्व्वप्रकारामभिलाषसिद्धिम् ॥
प्रस्थायिनो यस्य च दक्षिणाशां
शिवा रवं मुञ्चति दक्षिणेन ।
आदित्यमुक्ता यदि नो तदानीं
ध्रुवं भवेत्तस्य महीपतित्वम् ॥
वैवस्वताशां चलितस्य यस्य
दिवाकरस्तिष्ठति दक्षिणेन ।
शिवा च वामा कुरुते विरावं
सम्पद्यते तस्य समस्तमिष्टम् ॥
पुमान् यदा याम्यककुप्प्रवासी
करोति शब्दं पुरतः शृगाली ।
आस्ते विवस्वानपि सम्मुखश्चेत्
भवेत् तदानीमचिरेण मृत्युः ॥
नरस्य याम्यां ककुभं यियासोः
शृगालभार्य्या यदि पृष्ठभागे ।
फेत्कारमामुञ्चति मानवस्य
मृत्युश्च पुत्त्रेण भवत्यवश्यम् ॥
दिशं प्रतीचीं व्रजतः शृगाली
नरस्य यस्याभिमुखी विरौति ।
शान्ता स्थिता शान्तफलप्रदात्री
दीप्ता तु दीप्तं फलमातनोति ॥
प्राचेतसीं सञ्चलितस्य काष्ठां
शृगालिका जल्पति दक्षिणेन ।